# anAdikalpeshvarastotram

# અનાદિકલ્પેશ્વરસ્તોત્રમ્

## Document Information

Text title : anAdikalpeshvarastotram

File name : anAdikalpeshvarastotram.itx

Category : shiva, vAsudevAnanda-sarasvatI

Location : doc_shiva

Author : vAsudevAnandasarasvatI TembesvAmi

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Latest update : March 25, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# અનાદિકલ્પેશ્વરસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

કર્પૂરગૌરો ભુજગેન્દ્રહારો ગઙ્ગાધરો લોકહિતાવહઃ સઃ ।
સર્વેશ્વરો દેવવરોઽપ્યઘોરો યોઽનાદિકલ્પેશ્વર એવ સોઽસૌ ॥ ૧॥

કૈલાસવાસી ગિરિજાવિલાસી શ્મશાનવાસી સુમનોનિવાસી ।
કાશીનિવાસી વિજયપ્રકાશી યોઽનાદિકલ્પેશ્વર એવ સોઽસૌ ॥ ૨॥

ત્રિશૂલધારી ભવદુઃખહારી કન્દર્પવૈરી રજનીશધારી ।
કપર્દધારી ભજકાનુસારી યોઽનાદિકલ્પેશ્વર એવ સોઽસૌ ॥ ૩॥

લોકાધિનાથઃ પ્રમથાધિનાથઃ કૈવલ્યનાથઃ શ્રુતિશાસ્ત્રનાથઃ ।
વિદ્યાર્થનાથઃ પુરુષાર્થનાથો યોઽનાદિકલ્પેશ્વર એવ સોઽસૌ ॥ ૪॥

લિઙ્ગં પરિચ્છેત્તુમધોગતસ્ય નારાયણશ્ચોપરિ લોકનાથઃ ।
બભૂવતુસ્તાવપિ નો સમર્થૌ યોઽનાદિકલ્પેશ્વર એવ સોઽસૌ ॥ ૫॥

યં રાવણસ્તાણ્ડવકૌશલેન ગીતેન ચાતોષયદસ્ય સોઽત્ર ।
કૃપાકટાક્ષેણ સમૃદ્ધિમાપ યોઽનાદિકલ્પેશ્વર એવ સોઽસૌ ॥ ૬॥

સકૃચ્ચ બાણોઽવનમય્ય શીર્ષં યસ્યાગ્રતઃ સોઽપ્યલભત્સમૃદ્ધિમ્ ।
દેવેન્દ્રસમ્પત્ત્યધિકાં ગરિષ્ઠાં યોઽનાદિકલ્પેશ્વર એવ સોઽસૌ ॥ ૭॥

ગુણાન્વિમાતું ન સમર્થ એષ વેષશ્ચ જીવોઽપિ વિકુણ્ઠિતોઽસ્ય ।
શ્રુતિશ્ચ નૂનં ચકિતં બભાષે યોઽનાદિકલ્પેશ્વર એવ સોઽસૌ ॥ ૮॥

અનાદિકલ્પેશ ઉમેશ એતત્સ્તવાષ્ટકં યઃ પઠતિ ત્રિકાલમ્ ।
સ ધૌતપાપોઽખિલલોકવન્દ્યં શૈવં પદં યાસ્યતિ ભક્તિમાંશ્ચેત્ ॥ ૯॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીકૃતં અનાદિકલ્પેશ્વરસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*anAdikalpeshvarastotram*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*